संस्कृतवार्ता:

09.06.2024

सायम् - 06:20

## मुख्यवार्ता:

· भारतीय-जनता-पार्टीतिदलस्य वरिष्ठ: नेता नरेन्द्रमोदी अद्य सायं नैरन्तर्येण तृतीयं वारं प्रधानमन्त्रि पदस्य शपथ स्वीकरिष्यति। मन्त्रिपरिषद: अपि च शपथ ग्रहणम् अद्य।

· आकाशवाणी, दिल्ली, राष्ट्रपतिभवनात् शपथग्रहणसमारोहस्य साक्षात् प्रवाचनं सायं पादोनसप्तवादनात् आरभ्य आकाशवाणी सजीव वार्ता वाहिनीषु प्रसारणं भविष्यति।

· श्री प्रेम-सिंह-तमांग: श्व: सिक्किमस्य मुख्यमन्त्रिपदे शपथमङ्गीकरिष्यति।

· ओडीसायां बुधवासरे भारतीय-जनता-पार्टीति-दलस्य-प्रथम-मुख्यमन्त्रिण: शपथ-ग्रहण-समारोहस्य सज्जता संचलति।

· अद्य आईसीसी विशति प्रति विंशतिः विश्व चषक- प्रतिस्पर्धायां भारत-पाकिस्तानयोः मध्ये द्वन्द्वः ।

## प्रधानमन्त्री - प्रतिज्ञा ग्रहण समारोहः

केन्द्रीय नवीन प्रशासनस्य अद्य भावमानस्य प्रतिज्ञा ग्रहण समारोहस्य सज्जता सम्पन्ना । राष्ट्रपतिः द्रौपदी मुर्मूः एन.डी.ए. संसद् दलस्य नेतारं नरेन्द्र मोदिनं नवीन प्रशासनस्य निर्माणाय आमन्त्रितवती। शपथ ग्रहण समारोह: अद्य सायं सपाद- सप्तवादने राष्टर्पति-भवनस्य प्रांगणे भविता ।
राष्ट्रपतिः द्रौपदी मुर्मूः श्री नरेन्द्र मोदिनं तस्य मन्त्रि-परिषद: सदस्यान्, च पदस्य गोपनीयतायाश्च शपथं ज्ञापयिष्यति। श्रोमोदी परह्यः राष्टर्पतिना सह मेलनं कृत्वा नवीन प्रशासन-निर्माणस्य च प्रस्तावं प्रस्तुतवान् ।
राष्ट्रपति-भवनात् बहिः मोदी न्यगदत् यत् राष्ट्रिय - जनतान्त्रिक गठबंधनम् –इति दलं सुदृढं स्थिरं विकासोन्मुखं च प्रशासनं निर्मास्यति। श्रोमोदिना उक्तं यत् जनाः राष्ट्रिय – जनतान्त्रिक गठबन्धनमित्यस्मै एकं अवसरं दत्तवन्तः, अपि च एतत् अष्टादशम- लोकसभा नवीनानां यूनां च ऊर्जाया: स्रोतः अस्ति विदेश मंत्रालयेन सूचितं यत् श्रीलंकाया : राष्ट्रपतिः रानिल-
विक्रमसिंघे, मालदीवस्य राष्ट्रपतिः डॉ. मोहम्मद - मुइज्जुः, सेशेल्सस्य उप राष्टर्पतिः अहमद अफीफः, बांग्ला-देशस्य प्रधानमंत्री शेख हसीना, मॉरिशस् देशस्य प्रधानमंत्री, प्रविन्द कुमार जुगनौथः, नेपालस्य प्रधानमन्त्री पुष्प कमल दहल: 'प्रचण्ड' भूटानस्य च शेरिंग तोब्गे इमे सर्वेऽपि समारोहे भागं ग्रहीष्यन्ति। एते नेतारः अस्माकं संवाददातृभिः सूचितं यत श्री नरेन्द्र मोदिन: अनवरतं तृतीयं वारं प्रधानमन्त्री पदस्य शपथ ग्रहण - समारोहे भागं ग्रहीतुं निकटवर्तिनां देशानां विभिन्नाः नेतारः आमन्त्रिता:।

## चार्य पर चर्चा

श्री नरेन्द्र मोदी अद्य शपथ-ग्रहणात् पूर्वं स्व-दिल्ली-आवासे 'चाय पर चर्चा' चाये-पान-सहिता चर्चा इति आयोजितम्। अस्मिन् भारतीय-जनता-पार्टीति दलस्य नेता अमित-शाहः, जगत-प्रकाश-नड्डा, डॉ. एस.जय शङ्करः, निर्मला सीतारमणः, नितिन-गडकरी, धर्मेंद्र-प्रधानः, पीयूष-गोयलः, ज्योतिरादित्य सिंधिया, किरेन

रिजिजू: च सम्मिलिता: आसन्। लोक-जनशक्ति-पार्टीति दलस्य रामविलासदलस्य प्रमुख: चिराग-पासवानोपि प्रधानमन्त्रिण: आवासे अमिलत्।

## आकाशवाणी शपथग्रहण प्रसारणम्

आकाशवाणी, दिल्ली, राष्ट्रपतिभवनात् शपथग्रहणसमारोहस्य साक्षात् प्रवाचनं सायं पञ्चचत्वारिंशन्निमेषाधिक षड् वादनात् आरभ्य स्वीय एफ़एम गोल्ड, इन्द्रप्रस्थ तथा अहर्निशं आकाशवाणी सजीव वार्ता वाहिनीषु प्रसारयिष्यति। आकाशवाणी इत्यस्य Youtube प्रवाहिकायां आकाशवाणी एयर इत्यत्र अपि अस्य कार्यक्रमस्य प्रसारणं यथासमयमेव भविष्यति। अहमदाबाद, बेङ्गलूरु, चेन्नई, कटक, गुवाहाटी, हैदराबाद, इम्फाल, कोलकाता, मुम्बई, तिरुवनन्तपुरम आदिषु क्षेत्रेषु राजधानी आकाशवाणीस्थानकानि स्वराज्यसञ्चालनेषु स्वक्षेत्रीयभाषासु प्रवाचनं करिष्यन्ति, यत् राज्यानां एतेषु सर्वेषु प्राथमिक- वाहिनीषु स्थानीयरेडियोस्थानकेषु च प्रसारितं भविष्यति ।

## सिक्किम

श्री प्रेम-सिंह-तमांग: श्व: सायं चतुर्वादने सिक्किमस्य मुख्यमन्त्रिपदे शपथमन्ङ्गीकरिष्यति। सिक्किम-क्रांतिकारी-मोर्चा इति दलस्य प्रमुख: श्री तमांग: द्वितीयं वारं मुख्यमन्त्रिपदे प्रतिज्ञां स्वीकरोति।

सम्प्रत्येव सम्पन्ने सिक्किम-विधानसभा-निर्वाचने एस्.के. एम. दलेन द्वात्रिंशदासनेषु एकत्रिंशदासनानि विजितानि। एकम् आसनं सिक्किम
-डेमोक्रेटिक-फ्रंट-इति दलस्य अङ्के जातम्। अस्माकं वार्ताहरेण सूचितं यत एस् डी.एफ प्रमुख: सिक्किम-प्रदेशस्य पूर्वमुख्यमन्त्री पवन चामलिंग: उभयो: आसनयो: पराजितवान्।

## ओडिसा

ओडिसायां बुधवासरे भारतीय-जनता-पार्टीति-दलस्य-प्रथम-मुख्यमन्त्रिण: शपथ-ग्रहण-समारोहस्य सज्जता संचलति। तद्दिने प्रात: भजपाविधानमण्डल – दलस्य उपवेशनं भविता।

## ॠतु विज्ञान

भारतीय-ॠतुविज्ञान-विभागेन-पश्चिमोत्तर भारते आद्यरभ्य ऊष्णतरंग प्रवाहः सम्भावितः। विभागेन संसूचिंत यत् अग्रिमेषु पंचदिवसेषु मध्य-पूर्व-भारतस्य उत्तर प्रदेश- उत्तर-पूर्व मध्य प्रदेश राज्येषु भीषणा उष्णता भविष्यति। ॠतुविज्ञान-विभागस्य वैज्ञानिकः डॉ आर के जेनामणिना आकाशवाण्याः वार्ताहरा: संसूचिता: यत् अग्रिमेषु त्रि दिवसेषु मध्य महाराष्ट्र सहितं देशस्य दक्षिण क्षेत्रेषु वृष्टिः सम्भाव्यते।

भारतस्य ॠतु-विज्ञान-विभागेन रत्नागिरि, सिन्धुदुर्ग, सतारा, कोल्हापुर मण्डलेषु न्यूनात् अति वृष्टेः नारङ्गवार्णिकी संचेतना प्रसारिता। नासिक-अहमदनगरयोः च कृते वज्रपातस्य विद्युद्-द्योतनस्य च नारङ्गवार्णिकी संचेतना अपि प्रसारितास्ति। अद्य प्रातः मुम्बई-नगरस्य उपनगरेषु च अनेकेषु भागेषु निम्नवृष्टिः अभवत् । आईएमडी इत्यनेन मुम्बई-नगरस्य ठाणे, रायगढ-पालघर-सहितानाम् अन्येषां च विविधानां मण्डलानां कृते पीत-वार्णिकी-संचेतना ख्यापिता अस्ति ।

**इजरायल**

इजरायल- देश: गजा-पट्टी क्षेत्रस्य नुसीरतस्थले स्वीयान् बन्धकभूतान् चतुर: नागरिकान् आतंकीय-संघटनस्य हमासस्य निग्रहणात् विमोचनं कारितवान्। इमे नागरिका: विगते वर्षे अक्तूबर-मासस्य सप्तमे दिनाङ्के नोवा-संगीत-समारोहस्यावसरे अपहृता:। विमोचिता: बन्धका: उपचाराय चिकित्सालये पञ्जीकारिता:।

**तेलगु-देशम-दलस्य**

तेलगु-देशम – दलस्य राष्ट्रिय: अध्यक्ष: चन्द्रबाबू नायडू: जून मासस्य द्वादश दिनाङ्के आंध्र प्रदेशस्य मुख्यमन्त्रिपदस्य शपथं स्वीकरिष्यति। समारोह: विजयवाडायां भविता। श्री नायडू: चतुर्थं वारं राज्यस्य मुख्यमन्त्री भविष्यति।

**फ्रेंच-ओपन-टूर्नामेंट**

फ्रेंच ओपन-टेनिस्- स्पर्धाया: अन्त्यचक्रे अद्य ‘पेरिस’ इत्यत्र स्पेनस्य कार्लोस-अल्काराजस्य द्वन्द्व: जर्मन्या: एलेक्जेंडर-ज्वेरेवेण भविष्यति। एकविंशति-वर्षीयस्य अल्काराजस्य अयं तृतीया ग्रैंडस्लैम-फाइनल-स्पर्धा अस्ति। तत्रैव ज्वैरेब: प्रथमं वारं अस्या: प्रतियोंगिताया: अन्त्यं चक्रं सम्प्राप्नोत्।

**टी-20 क्रिकेट-विश्वकप: -**

अद्य आई सी सी विशति प्रति विंशतिः विश्व चषक- प्रतिस्पर्धायां भारत-पाकिस्तानयोः मध्ये द्वन्द्वो भविष्यति। न्यूयॉर्कनगरस्य नासाउ काउण्टी अन्ताराष्ट्रियक्रिकेट्क्रीडाङ्गणे द्वितीयसमूह अ-क्रीडायाम् भारतदलं प्रतिद्वन्द्विनं पाकिस्तानदलं सम्मुखीकरिष्यति। अस्य बहुप्रतीक्षितस्य द्वन्द्वस्य प्रसारणं भारतीयमानकसमयानुसारं सायं अष्ट वादने भविष्यति।

।। इति वार्ता: ।।